सर्वं जानाति देवः इति देवोभवान्। कुपितोमकरध्वजः इति मकरध्वजः कामः। देवः पुरारिः इति पुरारिः शिवः। मधुना मत्तः पिकः इति मधुर्वसन्तः। पातु वोदयितामुखमिति साम्मुख्यम्। विभाति गगने चन्द्रः इति चन्द्रः शशो। निशि चित्रभानुः इति चित्रभानुर्वह्निः। भाति रथाङ्गम् इति नपुंसकव्यक्त्या रथाङ्गं चक्रम्। स्वरस्तु वेदे एव विशेषप्रतीतिकृत् न काव्यादौ तस्य विषयोऽतोनोदाहृत इति, यथा। दुर्गालङ्घितविग्रहो मनसिजं सम्मीलयंस्तेजसा प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः। नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचं धारयन् गामाक्रम्य विभूतिविभूषिततनू राजत्युमावल्लभः। अत्र प्रकरणेनाभिधया उभावल्लभशब्दस्योमानाम्नी महादेवी तद्वल्लभभानुदेवन्टपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपोऽर्थो बोध्यते” सा०द०।

**अभिधायक** त्रि० अभि+धा—ण्वुल्। वाचकशब्दे “लिङ्गान्तरानभिधायकत्वं नित्यस्त्रीत्वमिति का० वृत्तिः २ तत्तच्छब्दोच्चारके च।

**अभिधायिन्** त्रि०अभिधत्तेकथयति अभि+धा—णिनि स्त्रियां ङीप्। १ कथके २ शब्दप्रयोक्तरि। “त्वं मुग्धाक्षि! विनैव कञ्चुलिकया धत्से मनोहारिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकां संस्पृशीति “अमरुशतकम् वाचकशब्दे च “प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते इति।

**अभिधावक** त्रि० आभिमुख्येन धावति अभि+धाव—ण्वुल्। आभिमुख्येन वेगेन गन्तरि।[धितुमिच्छायां विवक्षायाम्।

**अभिधित्सा** स्त्री अभिधातुमिच्छा अभि+धा—सन्-अ। कथ-

**अभिधृष्णु** त्रि० अभि+धृष—क्नु। अत्यन्तधर्षके। “तस्माद्ब्रह्मणः पश्चूनभिधृष्णुतम” शत० ब्रा०।

**अभिधेय** त्रि० अभिधीयते अभिधावृत्त्या बोध्यते अभि+धा—कर्मणि यत्। वाच्यार्थे सङ्केतयति शब्दार्थे। आविष्करातिशयोभिधेयवत् प्रतीयते” सा०द० “अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते का०प्र० ग्रन्थप्रतिपाद्ये च” “इतिप्रयोजनाभिधेयसम्बन्धा” इति मुग्धबोधम् ‘एतेनाभिधेयञ्च दर्शितम् सा० द०।

**अभिध्या** स्त्री अभि+ध्यै—अङ्। १ परधनस्याजिहीर्षायां, २ जिहीर्षायां, ३ विषयप्रार्थनायां ४ चिन्तने, च। अभिध्यायतेश्चिन्तनार्थत्वात् तथात्वम् “सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजा इति” मनुना आलोचने अभिध्यायतेः प्रयोगात् तस्यास्तथार्थत्वम्। “अभिध्योपदेशाच्च” शा०सू०।

**अभिध्यातव्य** त्रि० अभि+ध्या—तव्य। सततचोन्तनीये। “यः पुनरेतं त्रिमात्रेणौमित्यक्षरेण परं पुरुषमभिध्यायीतेति” श्रुत्या “परमेव ब्रह्माभिध्यातव्यमित्युपदिश्यते” शा०भा०।

**अभिध्यान** न० अधि+ध्यै—भावे ल्युट्। १ अभिध्याशब्दार्थे २अभितोध्याने च तच्च भिन्नजातीयप्रत्ययानन्तरितोऽविच्छिन्न एकमात्रविषयप्रत्ययसन्तानः। “तदभिध्यानादेव तल्लिङ्गात्” शां०सू०।

**अभिनद्ध** त्रि० अभितो नद्धः बद्धः अभि+नह—क्त। सर्वतो बद्धे “यथा सौम्य। पुरुषमभिनद्धाक्षमिति” छा० उ० “अभिनद्धाक्षं बद्धाक्षम्” भा० “परिरम्भरुचिं ततिर्जलानामभिनद्धा रसमानसारसेन” माघः।

**अभिनन्द** पु० अभि+नन्द—घञ्। १सन्तोषे, २प्रतिपाद्यगुणकथनादिनाऽऽनन्दे ३ प्रशंसायाम् ४अल्पसुखे च“योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दाः विस्फुलिङ्गाः छा० उ० “अभिनन्दाः सुखलवाः” भा०। अभिनन्दयति। अभि+नन्द—णिच्—अच्। ५ सन्तोषके ६ प्रोत्साहनेन प्रवर्त्तके च त्रि०। अभितो नन्दत्यत्र आधारे घञ्। अन्नस्य स्वकलत्रादि गुणप्रशंसनप्रवर्त्तकभ्रान्तिभेदे। तत्र हि स सुखायते। अभितोनन्दः। आ७नन्दमये परमात्मनि इति वेदान्तिमते। नैयायिकादिमते तु अभितोनन्दः दुःखाभावो यत्र ७ब०। परमात्मनि, सर्वदुःखशून्यत्वात्तस्य तथात्वम्। भारादिदुःखापनयेऽपि भारादिवाहकानाम् अहं सुखी संवृत्तः इति प्रतीतेर्दुःखाभावेऽपि सुखत्वोपचारदर्शनात् ईश्वरस्य सदा दुःखाभावाच्च तथात्वम्।

**अभिनन्दन** न० अभि+नन्द—भावे ल्युट्। १ सन्तोषे। णिच्—ल्युट्। सन्तोषार्थं २ प्रशंसने। कर्त्तरि ल्यु। ३ सन्तोषके प्रोत्साहनार्थं ४ प्रवर्त्तके ५ प्रशंसके च त्रि०। ६वृद्धभेदे पु०।

**अभिनन्दनीय** त्रि० अभिनन्द्यते प्रशस्यते अभि+नन्द—णिच् कर्मणि अनीयर्। १प्रशंसनीये २प्रोत्साहनेन प्रवर्त्तनीये च।

**अभिनन्दित** त्रि०अभि+नन्द—णिच्-क्त। १प्रशंसिते २अनुमोदनेन प्रोत्साहिते च।

**अभिनन्दिन्** त्रि० अभिनन्दति णिनि। १ सन्तोषिणि। अभिनन्दयति णिनि। २ अनुमोदनेन प्रोत्साहके। स्त्रियामुभयत्र ङीप्।